# ॥ श्रीगुरुपादुकास्तोत्रम् ॥

प्रणम्य संविन्मार्गस्थान्-आगमज्ञान्महागुरून् ।
प्रायश्चितं प्रवक्ष्यामि सर्वतन्त्राविरोधतः ॥ १ ॥

प्रमाददोषजमल-प्रविलापनकारणम् ।
प्रायश्चितं परं सत्यं श्रीगुरोः पादुकास्मृतिः ॥ २ ॥

यस्य श्रीपादरजसा रञ्जते मस्तके शिवः ।
रमते सह पार्वत्या तस्य श्रीपादुकास्मृतिः ॥ ३ ॥

यस्मै सर्वस्वमात्मानम्-अप्येकवृत्तिभक्तितः ।
समर्पयति सच्छिष्यस्तस्य श्रीपादुकास्मृतिः ॥ ४ ॥

यस्य पादतले सिद्धाः पादाग्रे कुलपर्वताः ।
गुल्फौ नक्षत्रवृन्दानि तस्य श्रीपादुकास्मृतिः ॥ ५ ॥

आधारे परमा शक्तिः नाभिचक्रे हृदाज्ञयोः ।
योगिनीनां चतुःषष्ठीः तस्य श्रीपादुकास्मृतिः ॥ ६ ॥

शुक्लरक्त-पदद्वन्द्वं मस्तके यस्य राजते ।
शाम्भवं तु तयोर्मध्ये तस्य श्रीपादुकास्मृतिः ॥ ७ ॥

अन्यत्सर्वं सप्रपञ्चं निष्प्रपञ्चा गुरोः स्मृतिः ।
तस्माच्छ्रीपादुका-ध्यानं सर्वपापनिकृन्तनम् ॥ ८ ॥

पालनाद्दुरितच्छेदात् कामितार्थप्रपूरणात् ।
पादुका-मन्त्र-शब्दार्थं विमृशन्-मूर्ध्नि पूजयेत् ॥ ९ ॥

श्रीगुरोः पादुकास्तोत्रं प्रातरुत्थाय यः पठेत् ।
नश्यन्ति सर्वपापानि वह्निना तूलराशिवत् ॥ १० ॥

काशीक्षेत्रं निवसस्तव चरणजलं जाह्नवी श्रीगुरोः नः ।
साक्षाद्विश्वेश्वरो नस्तव वचनतया तारकब्रह्मबोधे ॥ ११ ॥

त्वच्छ्रीपादाङ्किताभूरिह भवति गयात्वत्प्रसङ्गः प्रयागः ।
त्वत्तोन्यत-तीर्थदेवः क्वचिदपि च वयं न प्रतीमः पृथिव्याम् ॥ १२ ॥